ग्रहो बोध्यः एतेन तदंतांशस्य निषेधेपि हलङ्याब्भ्य इत्यत्र न दोष इत्यपास्तं यत्र प्रत्ययो निमित्तत्वेनाश्रीयते इत्यस्यैवं यत्रा
पीत्यनयैव कौडीकारो बोध्यः न त्रयत्रकेणः स्यपि नेत्यादौ एवमेतामन्निर्व्यात् तयोरेतत्पदमादाय निषेधो बोध्यस्तत्र
प्रमाणमहाद्याह अत एवेति नन्वेवं कुमारीब्राह्मणिरूपेति लौकिकवाक्यमिदं रूपेत्तु कुमारब्राह्मणिरूपेति
कर्मधारये पुंवद्विधानात् यद्वा कुमारीब्राह्मणिरूपायस्या न तर्यामिति बहुव्रीहिस्तत्र जातेश्चेति निषेधान्न पुंवत्त्वं
कुमार्यादिशब्दानां वैकल्पिकजातिकार्यस्य भाष्यादिसंमतत्वात् प्रथमत्यागेर्बीजं तत्र धर्मिग्राहकमानाच्चप्रत्ययस्य तत्र
द्वाप्यधर्मान्तवच्छिन्नवाचकशब्दोपादानं एवैतत्प्रहतिरूपा अत एव राज्ञेः कृतिविभाषेत्यत्रानेन न निषेधः राज्ञस्त १८

दसंभवत्वस्यन भ्रावारक्किवेताभृजादौ तत्संभवात् उपसर्गस्य घञित्यत्रन्तूपसर्गादयञोः संभवान्न निषेधः कुमारघा
त्याणि स्तेरत्यत्रतु हृत्यादिसहचयैर्णेहस्तावात्मीयः संज्ञाविधौ प्रदेशोघहृपेत्यादौ न देतग्रहणं होषतादस्यात् अथ
करणे तृतीयया स" मासः यसंज्ञायां तदंतविधौ प्रदेशोघहृपेत्यादौ प्रत्ययग्रहणाभावान्निषेधे वैयर्थ्यप्रसंगात् अयसंव
यसामान्यषष्ठ्यासमासः संज्ञायाविधौ संनयाकविष्ठावितिनिष्ठेति पूर्वनिपातविधौ निष्ठामात्रस्य पूर्वनिपातापत्तेः न
चकर्मषष्ठ्यासमासेन विधौ निषेधेपवादस्य प्रदेशे तत्सामर्थ्यात्तदभावोस्तीविशेषेवरप्रतिपदविधमेवेतिवाच्यं प्रत्ययग्रह
णेवापेवम्याद्यस्यस्टषतीर्णेद्दोहवृणदान परयेन विधिरिति सूत्रभाष्यविरोधापत्तेः राजेः कतिविभाषेत्यत्रापितदभा
वापत्तेश्च निषेधास्तेप्रदेशेन तदंतविधिह्वयेगौरवपरमब्राह्मणितिरस्यत्रहेरवः श्रोश्रोतिसतेनतस्मिन्विधौ तन्निषेधे प्रदेशाव
देतविधौ गौरब्राह्मणितरेत्यत्रैव श्रोश्रोतीति फलभेदस्य येन विधिरित्यत्र कैयटेनैवोक्तत्वाच्च निष्टेष्यत्रोक्तदोषापत्तेश्च
तत्रत्यपोलवस्य प्रावामत्वसारित्वमेवेतिबोध्यं उत्तरपदाधिकार इति प्रत्यासत्त्या उत्तरपदविशेषणतया आमंतदंतविधेर्व
निषेधिका अतएवमहृपेत्यत्र उत्तरपदादितिप्रपूर्वपदेनआमस्यननिषेधः अन्यथा भाषितपुंस्काघोडीतस्यहस्वइत्यर्थी
पत्तौ यत्तो हृपत्यादौ ह्रस्वान्नापत्तेः इणः शतविडीपिव हृपमेतत् अतएवष्णाडंतइतिहत्रेष्णडंतस्य पूर्वपदस्येत्यर्थसिद्धिः
अन्यथाऽयोगेपताप्तेरासेषाभावेनातिकारीषगंध्यापुत्रइत्यत्रापितदापत्तिः एतेनसर्पिषवत्पादाविवेयोगपयोगपेवप्यंतो

ॐ. स्तरतमादाय प्रत्ययग्रहणे वा पंचम्या इत्यनेनैव सिद्धो विधेयं वर्थैस्तपाल्ते शब्दरूपं विशेष्यमादाय प्राप्तं तदंतस्यैतेनानि
१८ षेधेपि उत्तरपदे इत्यादि विशेष्यप्राप्त तदंतताभावे शात्रेः कर्तीत्यादावपि तदापत्तेश्च अतएव लेखग्रहणस्य ज्ञापकत्वसंग
तिः अन्यथानेन निषेधे लेखशब्दे तदप्राप्तौ विध्यर्थं तत्स्यादिति तदर्हं गतिरिति दिक् १९ नन्वेवं परमकारीषगन्धीपुत्र
18 इत्यत्रैवेति इवशब्दो भिन्नक्रमः एवं प्रत्ययग्रहणे इति परिभाषास्वीकारे अतिकारीषगन्ध्यापुत्र इत्यत्रैवात्रापि तत्स्यादित्य
र्थः महदुपसीतरेणुजलमिति वचनात्तत्रापि नैतियावत् यद्वा यथा ऽत्र तमेव वाच्यं इति प्रत्ययग्रहणेन शब्दरूपं विशेष्य
मादाय तदंतविधौ उत्तरपदादित्याः पूर्वपदमपि विशेष्यं तात्पर्यस्य परमकारीषगंधीत्याद्यर्थमावश्यकत्वेन तत्रैवापि स्या
दित्यर्थः ननु विषयसप्तमी तत्स्वीकारे स्त्रीप्रत्यये इत्यस्माप्राप्तमस्त्वनुपसर्जनविषयेन वत्तदादिनियमोऽस्य चरितार्थोऽस्य स्वेतस्यर्थेन ।
द्विषयकवाक्योपप्लववत्वेनानुपसर्ज्जनविषयवाक्यस्य परमकारीषगंधीपुत्र इत्यादौ संप्रसारणार्थतया सार्थक्यो पि उपसर्जने
पत्यष्ठइ तदादि तदंतस्य पूर्वपदस्य संप्रसारणमित्युपसर्जनविषयवाक्यस्यैवेष्यार्थमेव नादशलत्वाभावात् यद्यपि कारी
षगंध्यापतिः स्वपमिनीयस्येति बहुव्रीहौ तत्संभवस्तथापि परिभाषाया अन्यायमत्येन आश्रयणेन यस्य समन्दायस्य स्त्रीप्रत्य
यांततमानेयवादर्थं प्रत्युपसर्जनस्यैव तदादि नियमागीकारादिति चेन्न प्रतिलदोलक्षणेपप्लववत्समर्वत्र सतेपि विष
निषेधे परमित्यादिना तत्तद्विषयकवाक्योपप्लवाभावबोधनमिवोपसर्जनविषये तदादिनियमो भवति इत्यनेन तत्तद्विषयक १८

वाक्यस्यैवाभावबाधेनातस्मान्मतः प्रामतदादिनियमस्य अनुपसर्जनविषयैर्निषेधमात्रार्थकत्वेपि उपसर्जनविषयो
शेतात्पर्याभावाच्च किंचित्कारीषगंध्याविनापि प्रत्ययस्यैव स्वलोपः तस्याः पतिरिति कारीषगंध्यापतिरित्यत्र तत्संभ-
वोप्यस्तीति प्राहुः नन्वेवं बहुमालेत्यादौ प्राचीनतान्तबहुत्वस्य स्यादिं इत्याप्ग्रहणमावश्यकं तदादिति यमाभावादेवैतत्प्र-
त्याख्यानासंगतिः न स्वचलिंगविशिष्टपरिभाषावसरः ग्रहणरहितस्य बहुमालइत्यादेः समुदायस्य प्रातिपदिकत्वाभा-
वात् ततश्चाप् बहुमालादेवदत्तेत्यादौ एकान्तरत्वेन एकान्तरतापत्तिरिति चेत् सत्यं प्रत्याख्यानपरभाष्यप्रामाण्येन प्राति-
पदिकस्य हत्वे येन बहुपर्यायोपस्थापकविभक्त्यन्वयकउपायेन तस्यैव ग्रहणात् प्रत्येकमपि पदत्वसत्वेनैकान्तरत्वाभा-
वाच्चादोषादिति स्पष्टं इत्याप् सूत्रे भाष्ये स्पष्टमिति बोध्यम् इयं वा विनिकेवेति केचित्प्रत्यये ग्रहणे यस्मादित्यत्र यविधि-
स्तदादौ इति योगविभागेन यङः डाप् इत्यतो स्त्रीत्यनुवर्त्य शार्ङ्गरवापिकारा अयणादर्थवत्समुदायस्त्रीप्रत्ययेऽनर्थेभ्यः स्त्रिया-
मित्यतः स्त्रायास्येत्यनुवर्तनेन स्त्रीप्रत्ययस्यैव विशेषणात् प्रधानस्त्रियावाचकप्रत्ययग्रहणेन तदादिविधिरित्यर्थादियेल-
भ्यत्याहुः तत्र भाष्यानारूढो विचार्यः यञ्छ्याङ् इति सूत्रे अनुपसर्जनस्येत्यस्यानुवृत्तत्वात्तस्यामर्थ्यान्तदादिनियमाभावः
एवंच ष्यङः तस्यानुपसर्जनत्वाव्यभिचारात् ष्यङ् विशेषणेन तत् अनुपसर्जने यत् ष्यङ् तदन्तस्य संप्रसारणमित्यर्थे
ति कारीषगन्ध्यापुत्रइत्यादौ नेदोषः गोस्त्रियोरित्यत्रापि शब्दरूपे विशेषणेन तत् अनुपसर्जने यत् ष्यङ् तदन्तस्य सम्प्र-

ॐ. १९ 19

सारणमित्यर्थे निकारीषगोयापुत्र इत्यादौ न दोषः गोस्त्रियोरित्यत्रापि शब्दरूपं विशेष्यमादाय लब्धं तदन्तेनोपसर्जनस्य विशे
षणात् स्त्रीप्रत्ययान्तत्वं उपसर्जनेन तदन्तप्रातिपदिकस्यार्थे अतिराजकुमारिरित्यादौ अपि न दोषः अतिकुमारिरित्या
दौ तु व्यपदेशिवद्भावो बोध्यः एवं च प्रयोजनानामन्यथासिद्धत्वेनैषा लक्ष्यसाध्येति चेन्न अतिगोवस्कयणीत्यादौ वस्कय
णीशब्दस्य गुणशब्दत्वाल्लौकिकोपसर्जनत्वेऽपि वदन्तस्य शास्त्रीयोपसर्जनत्वसत्त्वेन ह्रस्वापत्तेः न च तत्र सिद्धान्ते तदन्तद्वये
बाधकाभावेनेष्टापत्तिरिति वाच्यं गोस्त्रियोरिति सूत्रे भाष्येऽतिराजकुमारिरित्यत्र ह्रस्वाभावमाशङ्क्योक्तपरिभाषयाक्त
तसमाधेरेतज्ज्ञापकत्वात् अन्यथा परिभाषास्वीकारेऽपि तदङ्कारीत्यादोषस्य परिहरेतत्वेन नन्तदसङ्गतिः स्पष्टैव उपसर्ज
नस्य विशेष्यत्वे गोशब्दाशेत्तदन्तविधौ शोभनो गौः सुगौः न गौः अगौः न स्वजनानां नः स्त्नत्वरूषादित्वाभ्यां समासान्ताः
न परमान्सुगौरगौवपि स्यसुः रित्यादौ च पि तदापत्तेश्च अस्यायेव व्यपदेशिवद्भावग्रहणात् अतिमालचित्रगुरित्यादावव
गतेश्चेत्यले २ नन्वेवं तरपूर्वमपाविति अत्र यद्यपवक्त्व्यांतडुक्तोपरमसुगौपरमागौः शाक् कर्मणि क्तान्त इति य
क्ते वेत्यतः क्ते इति तृतीया कर्मणीत्यतः कर्मणीति चानुवर्तत इति भावः पदात्परत्वाभावेन च ननु कृत्स्नेनेवक्षपीत्य
तः प्राक् पदाधिकार इति स्वयमेव पदादिति सूत्रे स्थापिततेन गतिर्गताविति त्यस्य ततः परत्वेनानुक्तमिति चेन्न हेतो
व शब्दः यतः पदादिति स्थितत्वमतः पदात्परत्वाभाव इत्यर्थः क्वचिद्दीवडुवाक्ये यत्र पदादि स्थित्वेतत्रैव पदात्परत्वाभावस्या ९

नमानात् यत्रपदादित्युक्तंतेनतत्रतत्परत्वमितिनान्यत्रातिप्रसंगइतिभावः एवंचाभ्युदात्तमित्यस्य यदिपदादित्युक्तंतेनतदाने
न्तरग्रहणस्यतत्फलितमितिनतस्यज्ञापकत्वमितिबोध्यं यद्यपिभाष्येनेतरग्रहणंव्यर्थंगतिर्गतावितिवचनादित्युक्तंत
थापितदेकदेशयुक्तिरुक्तयुक्तेः अतएवोग्रभवत्येषापरिभाषाकृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणंयदयमनेतरग्रहणं
करोतीत्युपपद्यते नतेनापिकारकाद्युदात्तइतिबोध्यं नन्वेतत्प्रामाण्यात्तदनधिकारएवास्तु एवंचानाभ्युदात्तमित्य·
नेतरग्रहणस्यफलेज्ञापकपरभाष्यंतत्कथासंयोजनीयमित्याह नेत्यादिग्रंथेभावःबहुव्रीहौप्रकृत्येत्यतःपूर्वपदग्रहणं
मनुवर्ततेतत्रानुग्रहणार्थमस्यभाष्यामेकस्तुन्यायत्वापत्तिः एवंचाद्युदात्तउक्तशब्दस्याभिनास्यमात्ययामस्यप्रतिशिष्ट
याथादिस्वरस्यापिबाधनार्थमनेतस्योदोपूर्वपदस्यापिश्रुदात्तकल्पनयाऽनेतरग्रहणंतत्रथाथादिस्वरप्राप्तिरित्येतत्
परिभाषायामनेतरानसंभवतीतिऽतज्ज्ञापकमितिभाष्याशयः एवंचभाष्ययोरेकमेवनेकदेशयुक्तिस्तमपीति नन्वे
वमभ्युदात्तमित्यत्रैवकृदादागतत्स्यत्रापिप्राप्नोतीति नवकारकादत्तेत्यत्रकारकादितियोगविभागेनकारकात्पूर्वंगतिश्र
वेपदंक्रान्तमन्तोदात्तमित्यर्थकेनादोषाइतिवाच्यंएवंतर्हिकारकात्परेगतिपूर्वंपदंक्रान्तमन्तोदात्तमितिनियमार्थकयो
गविभागेनैवाभ्युदात्तेतिथाथादिस्वरप्राप्त्याकृडमरकृतिस्वरेणोदात्तत्वेसिद्धेऽनेतरग्रहणस्यज्ञापितेप्यचरितार्थ्यात्
भाष्यासंगतेश्च तस्मादुक्तन्यायात्ज्ञापकपरभाष्यप्रामाण्याच्चपूर्वभाष्यस्यैकदेशयुक्तितेनाभ्युदात्तमित्यादौव्यवहित

ओं
२०
20

निहत्यर्थमेवेति अनेनतरग्रहणं ज्ञापकमेव वस्तुतो भाष्येऽनेनतरस्याग्रहणस्य प्रयोजनमुक्त्वा ज्ञापकार्थमेव स्थापितेनेत
प्रयोजनान्तरमपीति तत्र व्यवहितनिहत्यर्थं न तत्र गतिर्गतावितिपरस्माद्व्याघनात् नापि अपूर्वपदत्वेस्तरार्थं कारकादि
तियोगविभागेनेव सिद्धेः तस्मात् ज्ञापकार्थमेव तत्रान्यत्रेवात्रापि ज्ञापकत्वे किं तद्बोधकमात्रमिति लभ्यते इति बोध्यं
तत्र यत्र गतिकारकसमभिव्याहृते कृदंते तत्र तद्विशिष्टस्यैव ग्रहणे देवदत्तेन कृतमित्यादेः प्रकृतिकत्वेन स्यात् समुदायस्य
मतेपि समासग्रहणं कृतं नियमेन परत्वाद्बाध्यादवयवस्य कृदंतत्वाभावादितिचेन्न विधेयोद्देश्यतावच्छेदकाक्रांतस्यत
स्य समभिव्याहारे इत्यर्थात् अत एव गतिकारकोपपदानां इत्यस्य समासांतकृदिनामिति फलमुक्तं भाष्ये अन्यथा स्वार्थिकत्वेन सुब
प्तेः प्राक्प्रवृत्तत्वे व्यनया परिभाषया विशिष्टादेवाण्सिद्धौ तदंशे गतिः स्यादेव तत्रापि प्रातिपदिकाच्छिपिकारेवाकसा
तत्वेन विशिष्टस्योद्देश्यताभावात् परत्वादिति उत्कृष्टत्वादपवादत्वादित्यर्थः तत्रकौडित्यन्यायादिति भावः स्त्रीप्रत्यय
चेति निषेधविषयेन्नयाक्रोशीत्यादौ वारितार्थेपि तत्याभियोग्यतायास्तत्रापि सत्वात् यद्यपि एवं हियामित्यत्र नदादि
नियमेनिषिद्धे समुदायादेव भविष्यतीति नास्य फले तथाप्यवयवात् व्याहृतये फलसत्वादिति भावः अन्यथेति अतएव
वभाष्ये गतिकारकेत्युक्त्वाप्येवमपि अवयवाद्भूत्पत्तिः प्राप्नोतीत्याशंक्यानयासमाहितं तन्विति तत्फले तच्छ्राणि
निष्कृते इति स्वरविधायके अस्यानपाक्षित्वात् क्रयमीत्यादौ स्वरसिद्धिरिति बोध्यं तेनेष्टकचित्रमिति इष्टकेषीका २०

मालानामितिसूत्रेउत्तरपदाधिकारेणपूर्वपदाद्यपातदंतत्पिविरितिभावः सवावयवैकोनस्थापकाश्वइष्टकाश्चिताश्चेति
समाहारद्वंद्वेपूर्वपदत्वाभावेपिह्रस्वापत्तेः पकेष्टकाचितमितिचेष्यतइतिभावः तेनतदोषेपफलाभावादितिपरास्ते ल
ष्यान्तरोपादिति पादस्यविशेष्यमित्यर्थः स्वागेयपादोपहृ तमेतद्रूपमित्यर्थः पत्रयोर्थवानिति अप्रायंतवदितिसूत्रेत
त्यत्याख्यानायस्त्राश्रितलोकसिद्धन्यायप्रयोजनमियापजहाद्येत्यादिप्रदर्शितं तत्रकेचित्पदेनेषवर्णितं अर्थवान्नोधीत
ल्लात एकैकयवोपकाजिति यद्यपितत्रभेदाभावादवयवत्वासंभवस्तथापिवन्यायवत्तबोध्यं तदस्तीति इत्यायेत्यादौच
काचूतोपपतिर्यातारवयवत्वेनान्यपदार्थत्वेनविवादितेर्थस्यापादानेवर्तिपदार्थत्वेनविवक्षितेतत्यागःप्रतिसंद्येलत्व
णोपल्लवादनेर्थकसमुदायविषयेऽडुणेनावेत्यादौनदोषः तद्विषकल्पणेनतरकल्पनादितिकेचिदाईयुः सत्यमवहा
रसत्वादिति अर्थभावः एवंसतिइयायेतिन्यायप्रयोजनेभाष्योक्तेविरुद्धस्यात् एकपदाकृतिसादाविवर्थविशिष्टयाता
त्यपदार्थतयाइकारादेवर्णस्यतदवयवत्वयावमव्यवहारस्येवमत्वात् नचभाष्येमव्यवहारस्येयापत्यादौउक्तौ
त्यासंभवेनसक्तुनानाश्रीयतइतिवाच्यं द्विविधावर्थविशिष्टान्यपदार्थत्वेनैकावितिबहुव्रीहावनर्थकेऽडुणेनावेत्या
दौअगत्यातत्रप्रथमतस्याप्यतिदेशेनवचनेपाठेऽप्रजरतीयसन्नैवित्यात्इतिवतत्रमव्यवहारमदिद्वियदिति
बोध्यं एकंपदोक्तिगोत्रहिन्यायस्यासलोकसिद्धतप्रतिपदनावमेरयदावर्णसमुदायःपदेपदसमुदायोक्तिगोत्र

ॐ २१

यते भवति चैतेदकस्मिन्नपि एकवर्णं पदं एकपदा इत्यः कात्रापि स्वर्थेनकको व्यपदेशः पदं नामार्थ इति प्रातिप
दिकमर्थं स्यात् इति महास्मिन्व्यवहार इत्यन्काप्रनेति दृष्टांतेन न्यायः साक्षितो भाष्ये तत्र कैयटोक्ते प्रकारस्तेन प्रकार
तिस्वपं भाष्यार्थमाह स्वकादेरिति असहाय इत्यस्यातिदिश्यमान धर्मेव दसमभिव्याहार इत्यर्थः नन्वयठादिशाह्
त्वात्तिदेशास्यात् व्यपदेशहेतुभावेनाविद्यमानव्यपदेशेन चरयोयेन्मादाविव स्यायप्रवृत्तेरिति चेन्न स्वसजातीयावधि
व्यवहारस्य भेदनिबंधस्य चभ्रेनेनतिदेशात् अत एव दृष्टान्त रयालेवः अस्तिवेयायेन्मादोएकाव्वृत्ते अवयवावयविनस्य
प्रथमते सजातीयनिह्यमेस्यचातिदेशः सजात्येव तातद्विपिविधेवकार्ये हि अपतावच्छेदकधर्माक्रांतसमुदायघटक
त्वरूपेवोध्ये नन्वेवमपि स्वस्मिन् स्वाव्यवहितपूर्वत्वपरत्वस्यातिदेशः प्राप्नोति ततश्चदधिमध्वित्यादौ यणादेशः स्यादिति
चेन्न तत्तद्विधौ तत्तन्निमित्तोपादानवैयर्थ्येन तद्वदतिदेशादितिदिक् नन्वेवं वीतोपीत्यादाविति नन्वेवमेनरण्णापि
परिभाषासामर्थ्याच्च तदादिलाभः अन्यथा तदंतविधौ यानेत्यर्थापत्त्या ग्रानर्थक्यं स्यादेवेति चेन्न नाव्वितागाव्विताद्
मादौ अल्लोपे कृते यांतप्रत्ययसंभवात् नवाल्लोपस्य स्थानिवत्वेन कारे परे कृतविधानेन प्रोताववयानस्यवयांतेवा
तविधानेनपि प्रोतयानस्याविवक्षणात् नपदांतविधिषयस्तन नः क्वातिनियमेनापेदत्वात् आदेशस्य परपदस्व
ताभावाश्च किंच गोमयमवतीति गोमयात् क्षिप्रतदवेहेषि विहितलोपे अत्रत्वादेशापेनस्थानिवत्वाभावेनमत्ययोतता २१

दतेरित्यत आह यस्मिन्विधिरिति सप्तम्यन्तपदार्थकस्य स्थानेऽस्य सर्वनाम्नोऽतिदेशः सप्तमीति सप्तमीत्यधिकरणे औपश्ले
षिके वा तेनाधीत्यादौ तन्न संभवे यथेनेडणीत्यादौ तदसंभवात् यद्यपि तस्मिन्निति वत् यस्मिन्नित्यस्यापि सप्तम्यन्तार्थे इत्यर्थः
स्तु वक्तुं तथापि इति शब्दाभावेन यस्ताद्धेतिवद्धमाणविरोधेन हलग्रहणं इमनेनानाधान्वयेन तथानाश्रितः हलग्रहणं इत्य
स्याधिकरणे लदाश्चलश्चारणे इति नार्थः प्रत्याहारग्रहणे तस्मात्र इवीतादौ दोषापत्तेः इकोचिविधेजनेऽभ्यस्तत् इति श्र
वचनादावितिव्याख्यानपरिभाष्यविरोधापत्तेश्च किं तु वाऽऽडलकाक्षमीणिल्लृइ्ग्रलः आतिपरिके सतीत्यर्थः तदादा
वित्यत्र तत्क्रदेन सप्तम्यन्तार्थः परामर्शनीयः एवं च सप्तम्यन्ते विशेषणीभूतश्रुतप्रतिपादकशब्देऽस्ति यद्धि यानेन तदा
दौ बोध्यमित्यर्थः फलितमिति बोध्यं यथा जयाः शुसीसर्वनाम्नः मद्धिश्यविधेयानन्तरलिंगकत्वेनापवादोऽयमितिश्च
पिवक्तुं शक्यत्वात् तु केरपवाद इयमित्युक्तावचनेन निहतावाचनिकोत्थः संप्रसारणमिति सिद्धेऽणुत्तरादावुत्तरपदे इत्य
र्थं वारणाय ल्यूग्रहणे अन्यथा पुत्रेयनमिति इदं चिन्त्यं तथा सति तदन्तविधौ कारीषगंध्यायनपुत्र इत्यत्रापि स्यात् तत्र तद
र्थं विशेषणविशेष्यभावव्यत्यासश्चावश्यक इति नेदं प्रयोजनमित्यादावपि स्यात् इयमिति नवाधर्थधात्वकस्य इल्ली
त्यक्तौ सामानाधिकरण्याभावात् यस्मिन्विधिरिति परिभाषाग्रहे तेनतस्मिन्निति परिभाषाग्रहणस्यावल्पकार्थधात्वकस्य इ
त्यर्थे भविष्यतीत्यादावेवत्वेन भवितव्यादावपीति नेद्वशीत्यादि निषेधस्तस्य शमीदेवदत्तेत्यादौ चरितार्थः एवं चादि

डों
२२

ग्रहणे स्वफलाभेलेचेत्र बद्धलक्षसंस्कारानुरोधनेनतस्मान्नुडवीत्यादेरवीमादेश्च वीत्यस्यैवदलीतिसूत्रस्याधप्पर्यंतेनागी
कारेणतास्मिन्नित्यायग्रहणासामानाधिकरण्यस्यापिसत्वेनपरिभाषाग्रहणे निर्वादत्वादित्याशयात् तेनड:सोतिनन्दंनवि
धभावायपदस्यैतस्यवैयधिकरण्यादेवननदंतविधिरिसवनयवशात्तदेपदावयवस्यैविद्याख्याता अन्यथाअनेनत
दभावेपितदंतविधिडवीरयवस्यात् इतिवेत्तत्रयंभावः पदस्यैतस्यपिकारेपिश्रुतत्वाडकारेणसकारोविशेष्यतेतत्रत
दादिविधेोयष्टन्तेनत्यायवकाशेपितदंतविधौशबोधितानव्यवहितहलसमुदायस्यसट्टतिष्योरितिनिर्देशेनासाधु
त्वबोधनेनत्रावेरिताध्यनसकारस्यसंयोगांतलोपबाधायेदत्याकनस्यक्रतान्वयस्यबाधापेदत्यावमाडयथायाइत्यादौ
सोऽहतपदस्यैतस्यावयवषष्ठीतस्यैवसामर्थ्यान्नत्वीकारइत्यभिप्रेतेवशात्सैवतथाव्याख्यातमितिबोध्यं कविविदिविस ल
स्यातरोयेनघ्नाघ्नप्रत्याख्यानस्यावसकारावहतेवदिग्रहणस्यावश्यकत्वात् ननास्यैमेवनत्रादिग्रहणस्यैवक्लेशस्यता
त् ड:साधुडितिसामसेननत्रादोषाश्च यथाम्नासस्यैनेरडाविवाहस्येदादावेवड्तोनसतिम्नायेनानतोलक्ष्यानुरोधस्यग्रवश्य
कत्वेनादावेवेतत्सीकारेऽदोषाश्च तीषसहेत्यादावेकदेशान्वयक्लेशस्यानावश्यकत्वाश्च नवनकारस्यव्यवहितलेस्यये
परेऽत्यर्थेअर्थात् यावदिप्रत्ययलाभेपरकइक्त्यादेः परस्यवलाधार्थयात्तकस्यैतस्याधर्थेनेकदेशान्वयइतिवाच्यं एवंस
तिवोतोमीत्यादावुक्तरीत्यावकाराव्यवहितपरकयोश्चोदोतोःवोतादेशाव्यवहितमत्ययेपरेऽत्यर्थेअर्थात्यादिप्रत्ययला २२

भेपरिषोक्तेरापत्तेः प्रावोंहलादेरित्यादिग्रहणेनग्रतिमत्वलाभेनडः सोन्यादावदोषाश्च एवमपिएकदेशान्यथाकरणेनला
घुवमितिषवङ्गत्नलभइतिहवस्कभाष्यमपिसरसतयवसेगकृतेइत्याङ्ः नत्वद्वियेतिद्वियोदीर्घोदित्तिनत्वविधायकेशास्त्रे
इत्यर्थः वत्वद्वियइतिदीर्घविधायकनिष्ठायामएपेदर्थेइतिदीर्घविधायकेचतत्वदीर्घातोन्वकरणस्याप्रयोजकत्वेनविद्वियत्वः
इत्यादौग्रजादौयङपेनस्यकृतेयङ्कारस्यान्वकरणान् ह्रस्वांतस्यतनान्वकरणेविपरीभ्यांडेरित्यादाविवपेरत्यादियङेबा
पितावेर्ङितीतिगुणस्यात् नचननविधावपितथैवास्त्वग्रतएवदीर्घादिति साथैका ग्रमप्यादीर्घातस्यैवान्वकरणेनेदृष्य:
ष्यैस्यह्रमेवेति अतएवशेत्वेरस्तेकृतेयदस्यान्वकरणात् दीर्घग्रहणेग्रन्यथानिर्देशेनेवदीर्घदीर्घग्रहणेसिद्धेऽइत्यकृतमितिवा
च्ये दीर्घादित्यस्यसत्वेहितत्वदीर्घानान्वकरणे तदभावेकृतेयङःकस्यान्वकरणमित्यपिसंभाव्येत नेतदीर्घातीत्वकरणे
स्यैवबोधकत्वादित्याशयात् अतोनशेत्वेरविरोधोऽनयाहा ज्ञापकमिति नत्वविधायकेद्वियइतिइयङ्निर्देशोज्ञापकइ
त्यर्थः तेनतत्रापिकृतेयङःकस्यान्वकरणात्कथंज्ञापकमित्ययास्ते नत्वरामाविति यथोद्देशत्वेनेनडपयोगः भविष्य
तिकिंचिदनेनप्रयोजनमितिन्यायेननित्यमप्येकादेशोबाधित्वापरनिमित्तत्वकृतेनोनरेगतात्सेदप्येकादेशस्यान्वमानिकत्वा
नियतेन तस्यस्थलभत्वात् अतएवरामइत्यादौपदत्वसिद्धिः अन्यथानित्यत्वात्सलोपस्वेनतस्याशास्त्रीयत्वेनविशेषणेत
यान्ययस्मेभवेलाश्रवणेनत्वस्यातनिवर्त्तायत्वात्तस्यात् तत्रस्याविसर्गपरिमाणग्रहणेनन्यायाप्रवृत्तेः निरपिपाठस्त्वु

ॐ क्तयैव अत एव सामान्येन स्वरसिद्धिर्नोक्ता कार्यकालेन सर्वं तत्तस्याशास्त्रीयत्वेनोहतिसदवस्य ख्यातिसंबंधयय यदुर्मतेनव
२२ तदप्रवृत्त्यात्तदसिद्धिरेव यथ्यारसमपदसंज्ञाविषये यथोद्देशपक्षेऽस्मिन् तथापि तत्स्वस्वाङ्गयप्रसङ्गाद्वेवतद्वेवातिप्रसंगा
त् प्रक्रान्तरमपि तत्रैव निरूपितं वस्तुतस्तु इदं शास्त्रीय तीर्थास्व समतेऽभ्यन्तरत्राङ्गेणापि तत्स्वीकारेणाभीयादि स्वच्छत्यपयवयगो
23 भावेनोपसर्गात्परस्य णत्वभावेन दोषाभावेऽपि प्रकृते यस्मादिहितस्वरादि स्वरदेनस्य तेनलाभेन पदत्वाल्लत्वेः भाष्येऽत्रप्र-
यत्र आश्रयणायाः स्वाङ्गिखरस्वकेऽदर्शनमिति स्पष्टं शोल्लरादेस्वमतेवन नरणत्वं चिकीर्षतीति वित् स्वतीस्मादोउरदत्वेहलादि :
शेषमन्यत इति इत्वचनस्यात्रिहितक्रियात पूर्वभाववत्त्वाभावेन तद्गुनरभ्यासत्वाप्रवृत्तेः अशास्त्रीयत्वेन ख्यातिवत्त्वाप्रवृत्तेरि
ति बोध्यं क्रुडादकमित्यत्रानेनोकारान्ततैनैकादेशविशिष्टे उदकशब्दस्वेनउदके केवले इति स्वरसिद्धिस्तुनासफले
उपसर्गानिलत्वेऽप्राप्यत इत्यत्राचः परस्मिन्निति स्थानिवत्त्वेनैवत्रापि त्यपवर्गस्य सफलत्वात् अजीगणदित्यत्रेव गणइत्यापि
नासाधारणं तत्रैतत्स्वाम्यर्थेनापीत्येसलभइत्यपि बोध्यं यत्तु जहत्स्वार्थायां वृत्तौ सद्यं जलमित्यादौ यणितद्विशस्यत्रेनेन
समासत्वात् इहद्विभाज्रजलेरित्यत्र सिद्धिरसाधारणं फलमितितन्न प्रतिपदविधित्वेन समासेऽनाइत्यत्र समासान्त
पदस्य समासार्थावलौकिकविग्रहवाक्यपरत्वेन पूर्वमेव प्रवृत्तेरित्यलं अस्यायमर्थः समासः समुदायः तेन ग्रस्त
मीलितेऽर्थे समुदायान्तरभूतमित्यर्थे इत्यव्यवहारः अन्तकरणमिमशास्त्राख्यानात् समुदायस्यावकरणस्यादर्शे २२

नादितिभावः एकदेशविकृतन्यायेन दीव्यतिशब्दैकदेशस्य तदर्थबोधकस्य दीव्येच्छब्दोच्चारणमित्यर्थः यथाश्व
तेन यतमाश्वभ्रुभ्रन्नकरणस्य शब्दपाठेनार्थस्यात् इति स्पष्टमयोते किमर्थमिति एवं हि लाघवाद्दीव्यतेरणीतिवक्त
व्येतस्मात्काष्ठाकदीव्यतीति निर्देशः किमर्थमित्यर्थः नन्वनुकरणतातस्यैवाधिपत्यमस्ति इति चेन्न अवश्यवधि
मतोः साजोस्त्रमिति नियमानर्थक्यं स्पष्टमवधितेन स्यात् तथा वाश्वत इति माशागिजोः पर्वोपयोविधानेस्यादिश
यात् अनेनैकदेशविकृतोर्थबोधयवेति सृवितमिति बोध्यं विकृतावयवेति अतएव मघवकतो राजकीयमि
त्यादौ संप्रसारणाल्लोपेन अन्यथानेन न्यायेन नान्तत्वात् श्वफवेति संप्रसारणं स्यात् राज्ञः कवेति कादेशे प्रतिनेनर
त्वादल्लोपेन इति स्यात् मघवतच्छब्दस्य संज्ञेनामत इत्यत्र केपर्येण फलाभावेन न दोष इत्यन्ये अव्रूपपरिमाणेति लो
केदृष्टस्य परिमाणस्यास्य संभवात् शब्दानुवृत्तीविशेषरूपेषु सते उक्तप्रक्रेरिति यथा लोके द्रोणादिशब्दानां
परिमाणार्थवाचकानामन्यतायिकृपोपगृहति स्तेषां परिच्छिन्नपरिमाणार्थकत्वात् डरूपयादप्यव सर्वनामानवीवि
शेष्टापोद्दानेन क्रीयमाणा सर्वनामसंज्ञाप्यनायिके सर्वकोदावले विनाडरूपपादे तु क्रेरित्यर्थः नन्वेवमेतादिव
श्वेति प्रयोजनेः गुडोदकमित्यादौ उदके केवले प्रकृतशब्दस्योदात्तनमनेन न्यायेन दकदव्दस्योदकशब्दत्वमाश्रित्य
साधितं भाष्यां क्रेविरुध्येत तत्रोदकरत्नक्रपरिमाणग्रहणात् प्रागदीव्यत इति सत्रे दीव्यत इत्यत्रपरिमाणग्रहणेन

ऊँ· २४

24

ज्ञापकपरिभाषांविरुध्येत भाष्यांतरे च तादृशेनोपलभ्यत एवेति अत आह एतदिति तत्रपंचद्रोणादिदृष्टांतेनोक्तस्थ·
लेतदभावमाशंक्य स ज्ञापकेन तदेकदेशभूतमिति न्यायेन समाहितं यदि तत्रैतन्न्यायप्रवृत्तिस्तर्ह्यर्थविकारस्थलेपि भूतः स्वतवत्
अकजविधिकस्य सर्वकस्य सर्वशब्दत्वमपेक्षितमेवेति भाष्यासंगतिरतस्तदाहृतमिति भावः एतेनानेन न्यायेनाका
रांते पूर्वपदे तं भाष्याभिप्रेतकेन न त्वेकदेशशब्द सत्वमिति तद्विरोध यइत्यपास्तो अंतादिवच्चेत्यत्र पूर्वांगवत्त्वे एतत्प्रयोज·
नस्योक्तत्वेन तदभिप्रेतत्वस्य स्पष्टमेव हृष्टुगाहूफत्वात् उकारांते पूर्वपदे उकारस्यैव तदायत्याफलभेदापत्तेश्चापरत्वादुद
दात्तत्वैकदेशेन न तत्सिद्धेः तदुत्तरभाष्ये एव स्पष्टत्वेन तस्यैकदेशयुक्तित्वाच्च अत एव तत्कन्यायाश्रयणे अन्यथा अत्रे
नैव गतार्थत्वात्तदनर्थकमेव स्यात् यदागम इति तु न गतार्थं आगमस्याविकारत्वात् अत एव लोपागमवर्णविकार
ता हीति भाष्ये आगमस्यापि विकारत्वं पृथगुक्तिः तुसे ज्ञापयाश्चक्रुःपरिमाणत्वाच्च एवं च येन विधिरिति सूत्रभाष्यविरो
धेनोदके केवले इति सूत्रमेकदेशयुक्तिः ज्ञापकपरिभाषात्वेन तत्रायेनदीयत्येतत् सरूपालाभेपि देवनकर्तृकरूपा·
र्थलाभेन तत्प्रयोजनविरोधे उक्तंचत्वलाक्षत्वयन विधिरिति सूत्रभाष्यमेकदेशयुक्तिरेवोक्तहेतोः अंगसंज्ञायामपि अक्त
परिमाणत्वस्य भाष्ये उक्तत्वेन अवः परस्मिन्निति सूत्रे आयमाविनश्चानेनो गतत्वातिशाकरणेन तद्विरोधाच्च लोकन्याये
नैव सिद्धेर्ज्ञापकानुपपादनपरिभाषाविरोधाच्च नेदकदेशभूतमिति लोके आगमस्यापि विकारत्वव्यवहारसत्वात् यदा २४

गमा इति न्यायेमास्त्व अनेनैव गतार्थत्वादित्य परमनुकूलमित्याह: विहृतानलहृपिति तेनयशशह्राखिणिणिविदि
लोपेनेनान्सं तनालाभेन स्थानिवत्वेन ततमाश्रित्यास्मायामेथा स्ततोविनिरितिविनिसिद्धिः अभीयादिति अत्रनंतनत्वसर्वे
मदादिगणेशत्वेरस्माहा नन्वेवंभिंडीमग्नेति नन्विदंमनुपपन्नंतदभावेहृतोरनकत्वात् पूर्वंसकृदुष्यतिन्यायोयस्मात्से
वकृत्वात् किंवनातङ्भावपदैभिंडीनत्वपिभावस्य स्थानिवत्वेभाष्यत्वापितस्यामेगतिः तत्र्यादेशेपितातङ्ग्रहः
क्रोतदसंगतिरेव किंवत्वातङ्पिभावयोर्योगापयासंभवेनयरत्वात्तातङ्वपितातङ्पिभावयोर्योगापयासंभवेनवि
रोधइतिवेदयंभावः विप्रतिषेधसूत्रस्यनियमार्थत्वेवेदेभ्यइत्यादिस्मीयस्मीयोदेशपतावच्छेदकाक्रांतयोः सपिबद्भवव
नेत्रालिंगनयोः पर्यायत्वाभावयोः प्रतिलक्षणलक्षणगपस्त्ववपिविप्रतिषेधइत्यनेनपूर्वेणास्यस्यलादिवद्भववनैवि
षयत्वेनाभावोबाध्यते अन्यथाशसहृयप्रामाण्याहिकत्यापतिः ईजतुरित्यादावपिद्वित्वसंप्रसारणयोः प्राप्तयोःपरे
संप्रसारणेभवतीत्यनेनौपदेशिकयजादियातोद्धित्वविषयत्वेबाध्यते तृहृणेइत्यत्रापिसूर्यकद्विशाहृस्पत्रयादेशाविष
यत्वेबाध्येते एवंचानायासेनैवसकृदितिन्यायसिद्धिः तेनाशीरर्थकस्यहेर्ध्वविषयत्वेनभितादित्यत्रतातङाबाधितोपि
भिंधीत्यत्रतदभावेनस्यादिति एववश्वनः प्रसंगेतिन्यायेनततत्यातान्सकोवसाभावोबाध्येतइतियेललभ्यायेतेनपूर्वे
तदनुक्तानपिनवतिरितिसूचितं नैवंभिंतादिस्यत्रापिध्योदेशापतिः तदविषयकत्वातङ्णसोपस्त्ववानर्थकापत्तेः

उ॰ २५

25

तेनसकम्प्रतिन्यायेयवलक्ष्यानुरोधादाश्रितइतिसूचितोविकल्पस्याभावोशोपिनात्पर्यमनेनउभयलक्ष्यत्वात् इतिड
डोर्थस्याप्युक्तबीजे अन्येथाविभाषाश्वेत्यत्रभावाभावाभ्यांसंप्रसारणस्यपाक्षिकत्वेलब्धेनवेतिसूत्रेविभाषेतिसूत्रस
लक्ष्यानुरोधमंगीकृत्यप्रत्याख्यानासंगतिः ममत्ववववस्यपीत्यस्यकृतः पूर्वइत्यादौचारितार्थ्येनविभाषाश्वेरित्य
स्यकृशावेमादौचारितार्थ्यएतभाभ्यांसूत्राभ्यांलिखनेनरेसंप्रसारणसाध्यितम्पर्थकाभ्यांसंप्रसारणस्यैवविधानेनविरो
धाभावान्नियमार्थकविप्रतिषेधसूत्राप्रवृत्त्याचारितार्थ्यात् अतएवाग्रेवक्ष्यतितत्रियमवशादेवतल्लक्ष्यविषयकप्र
वेशाप्तानपत्त्ववप्वेतिकेयदोक्तप्रकारस्तनयुक्तइतिसूहंगदाया द्वयोःकार्यवोरितिनावशेषहिकार्ययोगपद्यवि
प्रतिषेधः किंत संभवाधीतिभाष्येयद्विकार्ययोगपभावेकेवलेप्यसंभवइतिहितोनोक्तं यथासूपिवबहूवच
नेस्त्वेदितिश्रनयोहदेभ्यइत्यादौकर्णपदसंभवः अजादिष्वनेनैरपकारःसाधुर्भवतिअर्थात् यद्यपिविध्येया
निष्पन्नात्हिष्टापत्तेडरूपपादे एवंवसाप्यनेरादेत्तोगस्यदीर्घदीर्घइत्यादयर्थेऽपुगपत्तेभवेननास्तिविरोधइतिशा
कातेतेवक्तं तथापिशब्दानोनित्य साध्याकरणस्यसाधुप्रनुशासनतयासाधुत्वस्यैवविधेयत्वेनेवमेवोचितमिति
सूप्तमिकोगुणइत्यत्रविवरणे शिष्टादिनावप्यवमेवयद्यपितत्रादेशान्सूवंतडनरंवाख्यानिवतादिनास्यैवस्त
त्वनिमित्ताननयातथापितन्महत्त्वच्छेदकेकालेविरोधस्यैवेतिबोध्यं अत्रेदंबोध्यंअन्यतरस्वस्वनिमित्तानेत २५

र्थत्वेनान्तरस्य न दत्वेनास्ति प्रतिषेधः तथा राजेत्यादौ दीर्घस्य तत्त्रि मित्यामत्वेपि हल्ङ्यादिलोपस्य तान्त्वेन
न विप्रतिषेधः किंतु प्रतिपदोक्तत्वाद्दीर्घ एवेति स्पष्टं क्रोष्टु शब्दे शब्दस्त्वेवायत्राप्येकमेव कार्यमुभाभ्यामपि बोक
घतेतत्रापि विरोधाभावान्न विप्रतिषेध इति स्पष्टं त्वं तुङ्ङौ शाकल्यस्येति सूत्रे शब्दस्के लभ्यमानेनरेनामियत्रा
दौ स्वपि वेति दीर्घः स्यात् भवति इत्यर्थ एकयोः स्वपि च तामित्यनयोः रामाणामित्यत्र प्रवृत्तयोर्नास्ति विरोध इति तत्रै
व शास्त्रे स्पष्टं विप्रतिषेधपदशब्दस्य विरोधार्थकत्वात् परस्परलब्धावकाशयोरिति फलितार्थं परं अनन्तरान
काशत्वं अपवादत्वापत्तेः एवं मिङीति भिन्नस्यैतत्त्रेमर्थः मितादिति लक्ष्य इति यावत् यथाश्रुतेन संगतिः स्य
द्वैव एधतेत्यादाविति आर्धधातुके नियमस्य यास्ताशीविरणस्य च चारितार्थ्येन परत्वमिति भावः ननु परत्वा
दित्यस्य प्रोक्ता कृताकृतप्रसंगित्वेन विकरणे नानित्यत्वादिति चेन्न अनुदात्तङित इत्यादीनां नियमार्थत्वेन एधते।
भावेप्यनेनेत्यादि निवृत्तिफलकत्वेन तत्र च नियमशास्त्रप्रवृत्तौ तद्रूपस्यैवाभावे। न विकरणे प्राप्ताकृताकृतप्रसंगि
ताभावात् अतङ्विधानमिति ननु तथापि तेष्व चारितार्थ्यमेव विकरणेष्वागेव नियमस्य अप्राप्त्या नदानीं परत्वात्स
भवेन नियमबाधायोगात् न च तङ इतरेतत्स्य परत्वसंभवेन परिभाषामात्रे बाधतेन चारितार्थ्येन सामर्थ्याभावेन न
त्रकौंडिन्यन्यायेनापवादस्यापन्ननिष्पमाणस्यत्वेपि तद्दोषे पूर्वापि करणे पुनः आमस्य नियमस्य बाधनेन चरितार्थ्ये

उ॰ २९ तदितिवाच्यं तक्रकौण्डिन्यन्यायेनबाधस्योत्सर्गस्यपुनरप्रवृत्तेःसामान्यशास्त्रेणोभयसिद्ध्यापिवैयर्थ्यस्यतदवस्थत्वात्
अतएवदृशेविषयेप्रथमयोःपूर्वसवर्णइतिसूत्रस्थकैयटोक्तरीत्यान्यायानाश्रयणे अतएवस्यतासिभ्यांतिबादिबाधो
नएवंचकथंचारितार्थ्यमतआह विषयसत्त्वमीति एवंचनियमबाधेनचारितार्थ्यस्यसत्त्वमेवेतिभावः विषयसत्त्वमीत
स्वीकारेगौरवमतउक्तंलाघवकथनमाह विकरणेष्वपवादेपीति एवंनित्यान्तरंगयोरिति अनयोःपरापेत्वयाव
लवत्त्वमपियौगपद्यासंभवएवबाध्यमित्यर्थः विप्रतिषेधसूत्रेणपरस्यतत्रैवबलवत्त्वबोधनेनतत्त्वानयोरप्यर्थाद्यौ
गपद्यासंभवोस्त्येवेतिभावः अनयोःपरस्परंबाधकत्वेइत्यर्थइतितुनयुक्तं मानाभावात् यत्तेवनमित्यत्रापिअर्थ
वत्त्वदाभावेनतदंतादवयवानांप्रातिपदिकत्वेऽपिवर्णसमुदायस्यप्रातिपदिकत्वात्तदवयवत्वेनसुब्लुकिततःसुपःश्रव
णेइत्यर्थस्तत्रस्वशब्दरत्नविरोधाच्चेतिदिक् असिद्धंबहिरंगमंतरंगे॥ ४ ॥ श्रीशुभेहरिर्जी ॥ ४ ॥

दांतक दीटीका परिभाषेंदुशेखरस्य

ॐ श्री असिद्धं बहिरंगमंतरंगे अंतःर्व्याप्यानि अल्पानि निमित्तानि यस्य तदंतरंगं बहिर्व्यापकानि अंगानि निमित्तानि यस्या
स्तद्बहिरंगं अंगशब्देन शब्दरूपनिमित्तस्यैव ग्रहणात् तेनैवमत्र नाग्रहः अर्थस्य तेनाऽरूपमपि शब्दस्यान्ते विनिगमनाविरहात् अं
तरंगे कर्तव्ये जाततत्कालप्राप्तिकं वा बहिरंगमसिद्धमित्यर्थः सेयं कार्येऽन्यत्र सा स्वरूपेण अन्यव्यवस्थायां पूर्वोपस्थितानार्थ निमित्तत्वेनांत
रंगत्वात् द्वित्वात्पूर्वं सत्र प्रवर्तते तेनोद्दिष्टमिति शब्दकात्पूर्वं इति सूत्रे भाष्ये स्पष्टं स्यात् अन्यत्र सिद्धवत् अन्यव्यवस्थायां गुणवलो
पोऽंत्र संगेहठूठ अपवादत्वाद् लोपः लायतेः गुणात् अंतरंगत्वाद् गुणः अंगस्य बधितिनीमित्यत्र दाक्षणोः लध्वीमपथामाथयान्तके वा
प्रयति ऊठत्वकारांतमेगमन्नासिकादिवप्रत्ययमेतल्लापेक्षत्वाद् अंतरंगमप्यत्र कृते यण् गुणेन प्राप्तत्वात् गुणादंत
रंगत्वाद् ए नच ऊठोपि नित्यत्वेन गुणात् पूर्वं प्रवृत्तिः गुणस्यापि नित्यत्वात् न बाध्येतरंगेण यणा बाधितत्वाद् गुणस्यानि
त्यत्वे ऊठोपि शब्दांतरात् प्राप्तवान्नविधिरनित्य इत्यनित्यत्वात् स्यात् इत्यंतरंगत्वात् यणो गुणबाधकत्वमित्यनेन ऊदेत्
सापेक्षस्य बहिरंगत्वं येन विधिरिति सूत्रभाष्ये ध्वनितो के पदे ऽनेन स्पष्टमेवोक्तमिति न च येन विधिरिति सूत्रभाष्ये इकायण
वीत्सादावपि तदादितदंत विधौ स्यादि नेन्यत्रांतरंगत्वाद् यणो गुणबाधकत्वमिष्यते तेन तस्मिन्येत् ऊं न शब्दमाश्रित्य यणादेशो
न शब्दमाश्रित्य गुण इति दूषणमुक्तं तदसंगतं तदंतविधावपि बहुपदार्थापेक्षत्वरूपबहिरंगत्वस्य गुणे सत्त्वेन तत्र दोषा
दिति वाच्यं गुणे संज्ञापेक्षत्वेन तन्निमित्तनशब्दापेक्षया ऊनशब्दस्यापि कस्य यणपि सत्त्वेन समत्वात् परत्वाद् गुणः स्यादिया

स्वेत.
२

27

यात् पयस्पृदतिपयोददातिइत्यर्थेआपभगवद्वहेपयोदपयोदित्यादौएकपदस्थवर्णाद्वयसापेक्षत्वमंतरंगत्वेप्रतिवाक्यसेपा
दकपदांतरसापेक्षत्वस्यतस्यासिद्धत्वादेतस्यतस्सिद्धिः नवार्थस्यांगशब्देनग्रहणानतिस्थितिनिषेधवैयर्थ्यं उद्वापत्तेः नन्व
स्थानिवत्सूत्रस्थभाष्यविरोधादिदमसंगतं तथाहि अयादेशेस्वतस्सप्रतिपयोवक्तव्यः तिसृणामिति यदिवार्थस्यनि
मित्तत्वेतर्हिपूर्वमंतरंगत्वात्अयादेशेतपैवदीर्घेपश्चात्तिसृआदेशप्राप्त्यानदसंगतिः स्पष्टैव केचित्तुदीर्घोपदपयाप्रतिपदं
विधितात्अयेवदंति अर्थस्यनिमित्तशब्देनग्रहणे तिसृणामित्यादौदोषोपि नद्वसकापेक्षत्वमपेक्षत्वाद्यंयडादेशस्यांत
रंगत्वेनतदापत्तेः नवार्थस्यनिमित्तशब्देनग्रहणेवाहऊठसूत्रीयोठग्रहणस्यज्ञापकताभाष्यकारोक्तासंगता
तथाहि संप्रसारणसंबंधगुणस्यबहुसंज्ञासापेक्षत्वेनबहिरंगत्वादितिवाच्यं संप्रसारणस्यपदद्वयसापेक्षत्वेनभसंज्ञादिम
प्रत्ययनिमित्तकस्यनचगुणापेक्षत्वयाबहिरंगत्वात् अंतरंगचाक्षमस्यालिंगं उर्यंकार्यकालपक्षेत्रिपाद्यामपिप्रवर्तते ते
नावेडगंयेसोढ्ःसमरीसवोवक्तव्याः अविशेषोढ्वविहसाअविमरीत्यमिति भाष्योदादवणेषत्वाभावःसिद्धः तथाहि
सकारोच्चारणसामर्थ्यादादेशप्रत्ययोरितिषत्वंनेतिवाच्यं यदियपरिभाषायत्रिपाद्यांनप्रवर्तते अविदसाविमरीसा
भ्यांणिविक्षिपिदिलोपयोरसिद्धत्वात्सकारोच्चारणसामर्थ्यंसंभवपादमितिभाष्यासंगतिः ननुतस्यदोषःसंयोगादि
लोपलक्षणत्वेषिति वचनादंशेणपरिभाषायास्त्रिपाद्यामप्रवृत्तेरविदसाविमरीसाभ्यांणिचोऽनमियानमितिलभ्यते ।

राम

अन्यथा तदुदाहरणेनावाक्यार्थे निगात्यते माषवपनीत्यादीनामेतत्संगपरिभाषासर्पितात् किं तेनेति चेन्न परमतद्व्यापते
प्रहिणोतीत्यादीनां परिभाषासाध्यानां साधनाय वचनस्यावश्यकत्वेन परिभाषाया ह्यियायाम प्रवृत्तौ मानाभावात् नच
लणसूत्रे स्वभाष्यविरोधः तत्र हि अयमेव णकारोऽडिरन्तवद्यते पूर्वेश्च परिस्थित त्राणग्रहणेषु संदेहो भवतीत्युक्तेणवाऽ
न्यापोक्तिने तत्र करासिं सूत्रेण ग्रहणे संदेहः डरणपरऽइति शोक्तिते असंदिग्धं पूर्वेण न परेणेत्यत्र विनेपुनः शोकिते कृत
पत्तदिति समाधानवाधाह परोभावात् तत्स्त्रे स्वकालेऽपरेणः संतिपुनः शोकिते तन्नवायमस्ति कत्रर्थे इति समाधान
वाधाह किंवस्यादिति के शोकिताह यथात्रवपरत्वे स्यात् हयोः रफयोः प्रश्रवणे प्रसज्येत हलोयमां यमीत्येवं पकस्यात्रलो
पोभवतीति विभाषामलोपः विभाषा अश्रवणं प्रसज्येत अस्तु तर्हि नित्योलोपः रोरीति पदान्तस्येत्येवं सः नृशाकाः पदान्तः
स्येत्येवं विद्धि त्वात्तेऽहहि न स्यात् जर्त्स्येलेडि अजवोः पास्याइति इह तर्हि मान्हृणां पित्तृणामिति वपरत्वे प्रसज्येतेस्युक्ते
तत्र यदि त्रिपाद्यां तत्र परिभाषा प्रवर्तेत न दाऽनरंगे रोरीति लोपकर्तव्ये बहिरंगस्ये रेफादेशस्यासिद्धत्वाल्लोपाभावे कर्तव्ये ह
अर्थेऽन्यत्रैव दूषणानादिह तर्हि अत्यादि भाष्योक्तेदयवस्यादिति विरोधः स्सष्टुपवेतिवाच्यं फलोपऽइति सूत्रे तृनपैवाज
वोऽत्याशिषि प्यानोरिति हलस्य लोपऽइत्यादौ फलादीनामपि तत् राज्ञमित्यादौ संयोगान्तलोपस्यासिद्धत्वात् कथं दीर्घऽइत्याशो
काफलग्रहणेनाजवोऽइति भाष्योदाहरणेन उरण्परऽइति सूत्रे उरण्परऽइति भाष्यप्रयोगेणावनतत्वाद्धैकवाक्यतापत्ते

अंत: २८

28

पूर्वत्रासिद्धमिति सूत्रस्थपूर्वशब्देनैतत्सूत्रग्रहणं बोध्यत इत्युक्तत्वात्तेन पूर्वत्रासिद्धमित्यस्याप्रवृत्तौ अन्तर्वाशस्य दीर्घे
कर्तव्ये बहिर्भूतस्य पूनिमित्तकहत्वस्यासिद्धत्वात् अन्तरंगपरिभाषया दोषस्तथाप्येवन्नान्तरंगपरिभाषाया अप्रवृत्ति
साधकयुक्तिस्तद्दीर्घे ये हास्ति तस्मात् अन्तपोऽइति भाष्योदाहरणात् ढलोपविषये परिभाषा न प्रवर्तत इति न ज्ञाप्यते
किन्तु ढलोपशास्त्रोपयोगिशास्त्रविषये परिभाषा न प्रवर्तत इति एवं च रीत्यस्य ढलोप इति शास्त्रोपयोगितया परि
भाषाया अप्रवृत्त्या कर्तर्थ्यं हर्त्रर्थमित्यत्र दोषाभावः स्पष्ट एव अत एव वारतीत्यादौ लोपदीर्घसिद्धिरिति दिक् न च पर
स्परविरोधात् उभयोस्साम्ये त्रिपाद्यां न प्रवर्तत इति वाच्यं पूर्वत्रासिद्धमित्यत्र कर्तव्ये इत्यध्याहृत्य पूर्वत्र कर्तव्ये परम
सिद्धमित्यर्थात् विरोधाभावेन त्रिपाद्यामपि तत्परिभाषाया अप्रवृत्तौ प्रमाणाभावात् अत एव षष्ठोऽडः ध्वपकावामसंयो
गान्तस्य लोपः रदाभ्यामिडपधस्येत्यादि सूत्रस्थं भाष्यं संगच्छते न चाहि पञ्चाडि इति सूत्रे भाष्ये वर्णैकदेशवर्णग्रहणेन
गृह्यते नवेति विचारे यदि न गृह्यते तर्हि विनानेन ऋकारग्रहणं कर्तव्यं इहापि यथा स्यात् मातॄणं पितॄणामिति यद्यपि
न गृह्यते तेन रषाभ्यामित्येव तस्य सिद्धेः यद्यपि न गृह्यते तेन स्याप्यदोषः आचार्यप्रवृत्तिः ज्ञापयति भवति ऋकारान्तानां णत्वं य
दयं क्षुभ्नादिषु नृनमन शब्दं पठति नैतदस्ति ज्ञापकं ह्यर्थमेतत्स्यान्नामतिरिति यत्तर्हि तृप्नोति शब्दं पठति यच्चापि
नृनमन शब्दं पठति नन्वेतत्केह्यर्थमेतत्स्यादिति बहिरंगाहड्डिरन्तरंगेणत्वे असिद्धे बहिरंगमन्तरंगमित्यस्मिन्के तदुक्तं अ २

राम

यवाउपदिष्टायोगविभागःकरिष्यतेअतोनोणोभवतीतितन्नकह्रस्ववग्रहादित्युक्तं तत्रअतइतितपरकरणान्मातृ
णामित्यादौसिद्धत्वात्पूर्वंदीर्घेनृणामित्यादौचरितार्थंणत्वेनस्यात् तस्मादन्तरङ्गेणणत्वेकर्तव्येबहिरङ्गस्यासिद्धत्वमितिभा
ष्याशयःस्पष्टएव मातृणामित्यादौदीर्घस्यबहिरङ्गासिद्धत्वाण्णत्वाभावमितिवदताविवरणकारेणोक्तं इवएकावामि
तिसूत्रेभाष्ये अथेहकथंभवितव्यंप्रियमात्मानंमन्यतेब्राह्मणकुलेप्रियंमन्येब्राह्मणकुलमाहोस्वित्प्रिमन्यमिति।
प्रियमन्यमितिभवितव्यंस्वमोर्नपुंसकादितिलुक्कस्मान्नभवतिनाप्राप्तेलुक्यमारभ्यतेसमध्येवस्तपोथानितिएतेवा
यतेएवमपिस्वमोरित्येतन्नबाध्यतेकिंकारणंयेन नाप्राप्तेनस्यबाधनंभवतिमनाप्राप्तेस्तपोथानित्येतदारभ्यतेस्वमो
रित्येतस्मिन्पुनःप्राप्तेचाप्राप्तेचाथएवामध्येऽपवादाःपूर्वान्विधीन्बाधन्तेइत्येवमयमागमःस्तपोथानित्येतेनबा
ध्यतेस्वमोरित्येतन्नबाध्येत एवंतर्ह्यसिद्धंबहिरङ्गमन्तरङ्गेइत्यसिद्धत्वात् बहिरङ्गलक्षणोलुक्नभविष्यति नैषापरिभा
षाउत्तरपदाधिकारेशक्याविज्ञातुं इहहिदोषःस्यात्द्विषंतपःपरंतपइतिसंयोगान्तलोपोनस्यात् तस्मात्प्रिम
न्यमित्येवभवितव्यंइत्युक्त्वासंयोगान्तस्यलोपइतिसूत्रेसंयोगान्तस्यलोपेयणःप्रतिषेधःदध्यत्रमध्वत्र नवाझलोलो
पात्बहिरङ्गलक्षणत्वाद्वा अथवाबहिरङ्गोयणादेशः अन्तरङ्गोलोपःअसिद्धेबहिरङ्गमेरणंबहिरङ्गलक्षणात्
बहिरङ्गाहड्डिः अन्तरङ्गेणत्वेअसिद्धेबहिरङ्गमन्तरङ्गेइत्युक्तं इडुडपयस्यचाप्रत्ययइतिसूत्रेभाष्येहाड्भूनानोषते

ग्रष·
२८
29

वव्रश्चयैनैषुफलं दोष्णोरुष्णं नवाबहिरंगलक्षणत्वात् नवावश्च्यः किंकारणं बहिरंगलक्षणत्वात् बहिरंगाह
द्धिः अंतरंगमंतरंगे इत्युक्ते स्वरवसानयोरिति सूत्रे भाष्ये विसर्जनीयो ऽनंतरपदे इति वश्च्य इह माभूत् नाऽर्कंदः नाप·
त्यः ततर्हि वश्च्ये विसर्जनीयो ऽनंतरपदे इति नवाबहिरंगलक्षणत्वात् नवावश्च्ये किंकारणं बहिरंगलक्षणत्वात्
बहिरंगो रेफो ऽतरंगो विसर्जनीयः असिद्धं बहिरंगमंतरंगे इत्युक्ते एवं च पूर्वत्रासिद्धमित्यत्र कर्तव्ये इत्यध्याहारः स हे
एवावगत इति तदुत्तरकार्यकालपक्षो ऽप्ययं अज्ञातत्वात् एवं पाणिन्युक्ते नैष उक्तः परिहारः अंतरंगे बहिरंगमिति
प्रतिद्वंद्वभाविना ऽवेतो ऽप्यर्थः समंतरंगे बहिरंगं सति च बहिरंगे ऽन्तरंगे भवति नचात्र अंतरंग बहिरंगयोर्युगपत्सम
वधानमस्ति किंकारणं असिद्धत्वात् कथमसिद्धत्वं पूर्वत्रासिद्धमिति नचानभिनिर्वृत्ते बहिरंगे अंतरंगं प्राप्नोतीति
अनिमित्तमेव बहिरंगमंतरंगस्य भवतीति सिद्धो ऽतो कार्यकालपक्षमाश्रित्याह अनिमित्ते बहिरंगमंतरंगस्य किंकार
णं असिद्धत्वादिति ततः पूर्वपक्ष्याह कथमसिद्धत्वं यावता पूर्वत्रासिद्धमित्यसिद्धा परिभाषेति पूर्वत्रासिद्धमित्यनेन·
विसर्जनीयस्य पूर्वस्यां परिभाषायां असिद्धत्वात् तदनुपस्थानात् असिद्धो ऽयमस्या परिभाषेति कथं रेफस्यासिद्धमिति
तदर्थः सिद्धोतो कार्यकालपक्षमाश्रित्याह असिद्धं बहिरंगमंतरंगे इति एवमेषा परिभाषा सिद्धं भवति इह पूर्व·
त्रासिद्धमित्यत्र कर्तव्ये इत्यध्याहारे प्रमाणाभावे सति पूर्वपक्ष्याह कृतो ऽनाक्लृप्तेन तद्द्वयोः परिभाषयोः समवस्थित ३ राम

योः पूर्वत्रासिद्धमिति वासिद्धं बहिरङ्गमन्तरङ्ग इति वा पूर्वत्रासिद्धमित्यनेनाप्यपमृष्यासिद्धं बहिरङ्गमन्तरङ्ग इत्येतया व्यव-
स्था भविष्यति ननु नासिद्धं बहिरङ्गमन्तरङ्ग इत्येतामपमृष्य पूर्वत्रासिद्धमित्येतया व्यवस्था स्यात् अतः किमिति अतः पर-
स्परविरोधादुभयोरप्रवृत्तेः कथं नार्कंट इत्यादौ विसर्जनीयाभावः सिद्ध इति प्रश्नः सिद्धान्त्याह अतो ऽयुक्तः परिहारः न
वा बहिरङ्गलक्षणत्वादिति पूर्वस्मिन् कृते परस्यासिद्धत्वे फलाभावेन कर्तव्य इत्येवाऽऽन्याहाप्यारा ऽयुक्तः परिहारः न
वा बहिरङ्गलक्षणत्वादिति तदर्थः इत्यलमतिविदेर्थः स्मरेण इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति परिभाषायां प्राचीनमत-
निर्णयः अथ नवीनमते ज्ञापकं तु परिभाषायां वाह ऊठिति सूत्रस्थमूठ्ग्रहणमेव तथाहि वाह इत्येवं संप्रसारणग्रह-
णमनुवर्तते वाहेतस्य संप्रसारणं भवतीति सूत्रार्थः संप्रसारणे पुगन्ते णि एव निमित्ते लघूपधगुणे हूडिरेवीति हूडोः
सिद्धं विश्वौह इत्यादीति व्यर्थमूठ्ग्रहणं ज्ञापयति ज्ञापितं नायं तस्याप दृढ्याश्रयस्य बहिरङ्गस्य संप्रसारणस्यान्तरङ्गे गुणे क-
र्तव्ये ऽसिद्धत्वाल्लघूपधत्वाभावाद्गुणो न स्यादित्यूठ्ग्रहणं ननु नकारान्ते ऽकारान्तोपसर्गे वोपपदे वह धातोर्ण्यन्ता रथो-
पपदकाद्वाहः प्रयत्ने इत्यस्माद्धि वृक्विपोष्ठौठ्ग्रहणस्य सफलत्वात् कथं ज्ञापकमिति चेन्नातादृशविषये ज्ञापकपर-
भाष्यप्रामाण्यात् एवंविधक्विपोऽनभिधानात् न च विश्वौह इत्यादौ ऊडिदं पदेत्यादेनेनासर्वनामस्थान स्वरसिद्ध्य-
र्थमूठ्ग्रहणमिति वाच्यं ऊऊडिति सवर्णदीर्घेणोकारप्रश्लेषात्स्वरसिद्धेः न च प्रश्लेषाविद्धेषत्वादावतिप्रसंगः ऊठ

ग्रष·

साहचर्यादिणोनोगमहिश्पविहितोकारस्यैवग्रहणेनादोषात् अंतर्मध्येबहिरंगशास्त्रीयनिमित्तसमुदायमध्येअंतर्गतानि
निमित्तानियस्यतदंतरंगेतदीयनिमित्तसमुदायाद्बहिर्भूतोंगंबहिरंगं अंतरंगेकर्तव्येजातेतत्कालप्राप्तिकेचबहिरंगम
सिद्धमित्यर्थः अत्रांगशब्देनशब्दरूपमेवनिमित्तेशब्दोनोशब्दशा[illegible]वप्रधानत्वात् तेनार्थसत्तानिमित्तस्यनबहिरंग
त्वेनाप्यंतरंगत्वे अतएवननिषेधस्यादेशेसतस्यप्रतिषेधइतिस्थानिवत्सूत्रस्थभाष्यवार्तिकेचसंगच्छते अन्यथाही
त्वरूपार्थनिमित्तनिरपेक्षत्वाअंतरंगत्वात्अयादेशात्पूर्वदीर्घेउपधास्थानिस्थादेशोपुनर्लेपेलक्षणस्येतिनापित्नदीर्घाप्राप्तावत्र
यादेशप्राप्तोचतदसंगतिःस्पष्टैव अतएवातिस्त्रिणोत्मादाविपुङ्पेत्यापरत्वान्नुमसिद्धिः नवार्थस्यनिमित्तत्वाभावेसं
चस्कारेत्यादेरसिद्धिः येनैवक्रमणार्थंतेरोनैवक्रमेणशब्दानांषाडभीवइत्यचःपरस्मिन्इतिसूत्रभाष्यादपसर्गनिमित्त
कार्यस्येहित्वादितःप्रागेवप्रहृतेः शब्दोपास्थितोअगर्थज्ञानापेक्षत्वेपिसहृद्यावर्थस्यनिमित्तत्वात्उपादानात्
लाघवस्थायामडितिपदेसमस्करोदित्यादिसिध्यर्थंप्रवर्त्तमानेपरिभाषापरतयोगपस्यकरोतेःसुडित्यर्थोगीकारेनात्सिद्धेश्च
नन्वत्रसत्तायानिमित्तत्वातेगीकारेस्यानइत्यस्यासिद्धिः तथाहि सिवेर्बाहलकादौणादिकेनप्रत्ययेगुणएवलोपोउठो
प्रसंगेऊठअपवादत्वाद्वलोपेबाधतेगुणेंतरंगत्वाद्बाधते गुणोह्यंगसंबंधिनीइग्लक्षणालघ्वीमपधाअईथा·
त्केवाश्रयति ऊठत्ववकारांतमनन्तासिकादिवप्रत्ययमित्यल्पापित्वत्वादंतरंगमनवहृतेयणगुणोप्राप्नुतःगुणादेन ४ राम।

रंगत्वाद्यणःपरिभाषायोरग्रेगशाह्नेनसंज्ञाया ग्रेगग्रहणेगुणात्तोःसमत्वात्परत्वेनगुणएवस्यादितिस्यान्नइत्यत्रेतरंगत्वाद्य
णोगुणबाधकत्वमिष्यतेइतियेनविधिरितिसूत्रभाष्यासंगतिश्चेतिचेन्न उठोनित्यत्वेनगुणात्पूर्वमेवप्रवृत्तेः गुणस्यत्व
उठियणश्चेतरंगेणबाधितत्वादनित्यः ननुवोठपिशाह्नांतरप्राप्त्याऽनित्यः गुणपिशाह्नांतरप्राप्तवान्विधिरनित्यइत्युभ
योःशाह्नांतरसमत्वात् नन्वेवमपियेनविधिरितिसूत्रेभाष्येइकोयणचीत्यादौतदंतविधिरितिस्यान्नइत्यत्रांतरंगत्वाद्य
णोगुणबाधकत्वमिष्यतेतन्नसिद्धेत् उनशब्दमाश्रित्ययणादेशोनशब्दमाश्रित्यगुणइत्यस्यासंगतिः अत्रपदेगुणस्यैव
वर्णापेक्षत्वात्ततरंगत्वेनोठियणबाधितत्वादनित्यत्वाभावेनोभयोर्नित्ययोःपरत्वाद्गुणएवस्यादितियणगुणयोर्विवाद
भावात् समत्वगुणादंतरंगत्वादठितद्वत्स्यादितिचेन्नतदभाष्यस्यनित्यत्वविधानद्वारैवरूपासिद्धेस्तात्पर्यात् अस्मया
तदंतविधिस्वीकारेपिगुणस्यबहुसंज्ञासापेक्षत्वेनान्तरंगत्वाद्यणोगुणबाधकत्वमिष्यतेतन्नसिद्धेदित्यस्यउनशब्दमा
श्रित्येत्यस्यवासंगतिस्तद्वत्स्थितिदिक् इयेवत्रियायांनप्रवर्तते त्रिपाद्यासिद्धत्वात् अस्यांवावाउठस्त्रस्थउठग्रहणस्या
पकमित्येषासपादसप्ताध्यायीस्था नवकार्यकालपक्षेत्रियायांतत्पक्षमेउेवांरते पूर्वप्रतिपरासिद्धत्वादभावेनपूर्वंस्यत
त्रिद्रूपितवहिरंगत्वाभावात्तयानस्यासिद्धत्वप्रतिपादनासंभवात् नचानयापूर्वस्यासिद्धत्वेनपूर्वप्रतिपरासिद्धत्वेपूर्व
त्रैपादेनेनवक्तुमशक्यमितिवाच्यं विनिगमनाविरहादुभयोरप्यप्रवृत्त्यापत्तेः किंचपूर्वत्रैपादस्यप्रत्यक्षत्वेनानुमानि

कात्रस्याबाधधोचितः अतः कार्यकालपक्षोपि त्रिपाद्यामसोनुपस्थितिरेव ननु यत्राङ्गस्येवेदं न्येश्चपकाबोमस
अन॰ योगो नस्परदाभ्यामिति चेत्र तस्य दोषः संयोगादिलोपलतेष्विष्टस्य कात्यथवा कार्यनिगालत्वे निगाद्यते मायवपनी
२१ तिभाष्यकृतादतानि प्रयोजनानि तस्यार्थभावः पूर्वत्रेत्यत्र वर्तते अत्र व्याहारे प्रमाणाभावात् गौरवादपपदविभक्तेरिति
31 न्यायाच्च वैशेषिकेऽधिकरणएवमसप्तमी पूर्वविषयेपरमसिद्धमिति तस्यार्थः एवंवक्तृतेपूर्वत्रपरस्यासिद्धत्वेनो
भयाः परस्परविरोधात्त्यागस्यापेक्षा यापूर्वत्रेत्यस्य प्रत्यक्षतेनानुमानिकाप्राप्तिः परिभाषायाबाधस्यैवोचितात्
नचपूर्वोक्तैरेश्राडिःत्यादिसूत्रस्थभाष्योक्तेर्विरोधात् उपपदविभक्तेरितिन्यायस्यबाधस्यवभावेनेति सप्तमीक
र्तव्ये इत्यव्याहारश्रेतितिवाच्ये स्वरवसानयोरितिसूत्रस्यभाष्येणतम्राध्याणंदूषिततात् नचावेडंगपरइतिवा
र्तिकस्याविहसाविसरीसमित्युदाहरणयोर्भाष्योक्तयोरसंगतिः आदेशप्रत्यययोरितिषत्वप्राप्तिरितिवाच्यम्
सकारोच्चारणसामर्थ्येनतदभावसिद्धेः नचाविहसाविसरीसाभ्यांणिचिटिलोपणिलोपयोरविसरीसइत्य
त्रकृतार्थसकारोच्चारणस्यसामर्थ्यं केतोभ्यांणिवोनभिप्रातेनो नन्वसार्थेतस्यदोषइत्यारब्धोयमेव तथाच
समाधानस्यसमाधानोंतरादूषकत्वात् इतिन्यायेनयथादेशपक्षसाधारणेपनपूर्वोक्तोदाहरणानांतकथनेपि
प्रदोषात् इतिचेत्र प्रयोजनोंतराकथनपूर्वकतदुदाहरणपरभाष्यस्यारस्यसंगायते अस्यतेषामपिसाधारण ५ राम

त्वप्रतीतेः खरवसानयोरिति सूत्रस्य भाष्याच्च त्रिपाद्यां परिभाषाया अभावश्च लभ्यते तथाहि विसर्जनीयोऽन्
तरपदे इति वक्तव्ये इह मा भूत् नार्क्कुटः नार्पत्यः तत्र हि वक्तव्येन वक्तव्ये किं कारणं बहिरंगत्वात् बहिरंगो रेफोऽन्तर
ंगो विसर्जनीयः असिद्धं बहिरंगमन्तरंगे नैष दोषः परिहारः अन्तरंगे बहिरंगमिति वप्रतिद्वन्द्वभाविना वेतीय
द्वौ मत्यन्तरंगे बहिरंगे सति च बहिरंगे अन्तरंगं भवति न चात्रान्तरंगबहिरंगयोर्युगपत्समवधानमस्ति किं कार
णं असिद्धत्वात् कथमसिद्धत्वं पूर्वत्रासिद्धमिति तानाभिनिर्वृत्ते बहिरंगे नान्तरंगं प्राप्नोति तत्र निमित्तमेव बहिरं
गे अन्तरंगस्य भवति अनिमित्ते बहिरंगमन्तरंगस्य किं कारणं असिद्धत्वात् कथमसिद्धत्वं वावत्ता पूर्वत्रासिद्धमित्य
सिद्धा परिभाषा असिद्धं बहिरंगमन्तरंगे कथं कार्यकालसंज्ञापरिभाषे खरवसानयोर्विसर्जनीय इत्यत्रोपस्थितमिदं
भवति असिद्धं बहिरंगमन्तरंग इत्येवमेषा परिभाषा सिद्धा भवति सिद्धान्तमाह कृतेन खल्वेतयोः परिभाषयोः साव
काशयोः समवस्थितयोः पूर्वत्रासिद्धमित्येतामपवदयासिद्धं बहिरंगमन्तरंग इत्येतया बाधकत्वं भविष्यति तथुन
रसिद्धं बहिरंगमन्तरंगमित्येतामपवदमसिद्धं बहिरंगमित्येतया पूर्वत्रासिद्धमित्येतया बाधकत्वं भविष्यतीति त्रिपा
द्यामन्तरंगपरिभाषाप्रवर्तनमाह अतः किमिति किमेतावता द्विधा उत्पत्त्यर्थः सिद्धान्तमाह अतोऽयुक्तोऽयं परिहारो
नवा बहिरंगलक्षणत्वादितीति अतः परस्परविरोधात् उभयोरप्रवृत्तेः प्रत्यक्षेण पूर्वत्रेत्यनेनानुमानिकान्नसि

इयपरिभाषायाबाधात्वयुक्तः परिहारः नचाबहिरंगलक्षणनादिनीतितदर्थः नचकृतेपूर्वत्रासिद्धत्वफलाभावेनेदंसर्वं
अनः प्रसंगतमितिवाच्यं डद्यंदीर्घ्याद्यादौफलस्यसत्वात् तथाहि डहेः क्तेन्द्रविद्रादेर्यातोरितितकारद्वयस्यल्निमित्तके
घत्वेकृतेचकारनिमित्तकेस्मषत्वयोर्वितिनस्यचत्वेनस्मात् तथाचनिमित्तकजस्त्वेचनस्मात् सन्निपातपरिभाषाविरोधा
३२ त् पूर्वत्रकृते ऽघसिद्धत्वेनचयत्वनयोरपिपूर्वयोर्ढत्वस्यजस्त्वस्यचासिद्धत्वान्नपरिभाषाविरोधः नचात्रपरिभाषायाअनि
32 त्यत्वेनादोषः अनित्यत्वेप्रमाणाभावात् तस्यपरिगणितत्वाच्च नचारोपितसिद्धत्वेपिवस्तुतस्तद्वियातस्याविघ
मानत्वाज्ज्ञापकेरुक्तिदिश्यमानधर्मविरुद्धत्वाश्रयप्रवृत्तकार्याभावस्यातिदेशस्यभावसिद्धत्वादाहार्यारोपस्यापिशास्त्र
बोधितग्रहणग्रहतिनियामकत्वात् ननुसन्निपातस्याशणात्मीयत्वात्कथंपूर्वत्रासिद्धमितिप्रवर्ततेइतिचेन्न नहोधः पमय
उभौवौवेत्यादिति ज्ञापकादत्रविषयेनतत्प्रवृत्तेः तथाहिनहोदइत्येवकर्तव्येधग्रहणेनढमित्यादौक्तनकारस्यध
त्वार्थंरदाभ्यामित्यस्याप्रवृत्त्यर्थंतसन्निपातविरोधात् एवंचसन्निपातपरिभाषाविरोधाइत्वमपिनभविष्यतीतिवर्थं
मेवधग्रहं सन्निपातस्याशणात्मीयत्वेपिपूर्वत्रासिद्धमित्यस्यप्रवृत्तिं ज्ञापयति एवंमूयउभौवेत्येवइकोवर्णात्यनेनतरो
कर्तव्येत्रिपाद्यावादेशेपवि ड धीरातोपयतिपूर्वत्रासिद्धमितीदृशेविषये ॥ ६ राम

शांकरी टीकापरिभाषेंदुशेखरस्य